ता दोष इत्युत । एवमुक्त्वा स भगवान् कुन्तिराजसुतां तदा । प्रकाशकर्त्ता तपनः सम्बभूव तया सह । तत्र वीरः समभवत् कर्णः शस्त्रभृतां वरः । आमुक्तकवचः श्रीमान्देवगर्भः श्रियाऽन्वितः । सहजं कवचं बिभ्रत् कुण्डलोद्योतिताननः । अजायत सुतः कर्णः सर्व्वलोकेषु विश्रुतः" । भा०आ०प० । सुग्रीवोत्पत्तिः सुग्रीवशब्दे द्रष्टव्या ।

**अरुणानुज** पु० अरुणस्यानुजः । गरुड़े तस्य ततोऽनुजातकथानूरुशब्दे द्रष्टव्या । [रोह रणे हरिः" हरिवं० ।

**अरुणावरज** पु० ६त० । गरुड़े "अरुणावरज श्रीमानारु-

**अरुणित** त्रि० अरुणं क्रियते स्म अरुण+कृत्यर्थे णिच्—कर्म्मणि क्त, तारकादि० इतच् वा । १रक्तवर्णीकृते २जातलोहितवर्णे च । "स्तनाङ्गरागारुणिताच्च कन्दुकात्" कुमा० ।

**अरुणोदक** न०अरुणमुदकं यस्य । १सरोवरभेदे । उदकस्य वा उदादेशे अरुणोदमप्यत्र । तच्च सरः मन्दरगिरिरूपविष्कम्भपर्वतस्थम् वि०पु० । २नदीभेदे स्त्री सा च "मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसोगिरिशेखरस्थूलानि फलान्यमृतकल्पानि पतन्ति । तेषां विशीर्य्यमाणानामति मधुरसुरभिसुगन्धिवहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणैलावृतमुपप्लावयति" इति भागवतोक्तस्थलस्था ।

**अरुणोदय** पु०अरुणस्यार्कस्य तत्किरणस्योदयो यत्र । "चतस्रो घटिकाः प्रातररुणोदय उच्यते" इत्युक्ते सूर्य्योदयात् प्राचि चतुर्दण्डात्मके काले ।

**अरुणोदयविद्धा** स्त्री अरुणोदयकाले विद्धा । अरुणोदयकाले दशम्या विद्धायामेकादश्याम् । "दशमीशेषसंयुक्ता यदि स्यादरुणोदये । वैष्णवेन न कर्त्तव्यं तद्दिनैकादशीव्रतम्" हेमा० भवि०पु० 'अरुणोदयविद्धा तु द्वादश्यां पारणा लाभेऽपि वैष्णवैर्नोपास्या" ए०त० रघुनन्दनः ।

**अरुणोदयसप्तमी** स्त्री अरुणोदयकाले पुण्यविशेषसाधनं सप्तमी । माघशुक्लसप्तम्याम् । "सूर्य्यपर्व्वेण तुल्या हि शुक्ला माघस्य सप्तमी । अरुणोदयवेलायां तस्यां स्नानं महाफलम् । माघे मासि सिते पक्षे सप्तमी कोटिभास्करा । दद्यात् स्नानार्घदानाभ्यामायुरारोग्यसम्पदः । अरुणोदयवेलायां शुक्ला माघस्य सप्तमी । गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समेति" ति०त० भविष्य पु० ।

**अरुणोपल** पु० अरुण उपलः । (चुनीति) ख्याते पद्मरागे ।

**अरुन्तुद** त्रि० अरूंषि मर्म्माणि तुदति तुद—खश् मुम् च । मर्म्मपीड़के दुःखदायके "अरुन्तुदमिवानालं नववद्धस्य दन्तिनः" इति रघुः "नारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्मकृत्" मनुः ।

**अरुन्धती** स्त्री न रुन्धती । १ रोधनाकारिकायां स्त्रियाम् २ वसिष्ठपत्न्याम् संज्ञात्वादव्युत्पन्नः "अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम्" रघुः "आर्य्याप्यरुन्धती तत्र व्यापारं कर्त्तुमर्हति" "साक्षादिव तपःसिद्धिर्बभासे बह्वरुन्धती" इति च कुमा० । सा च कर्द्दमप्रजापतेराकूत्यामुत्पन्ना भाग० तपसा सिद्धा नक्षत्ररूपेण सप्तर्षिस्थाने स्थिता । ३ तन्नामके नक्षत्रभेदे तत्स्थितिस्थानञ्च "प्रागुत्तरतश्चैते सदोदयन्तेससाध्वीकाः । पूर्व्वे भागे भगवान् मरीचिरपरे स्थितो वसिष्ठोऽस्मात् । तस्याङ्गिरास्ततोऽत्रिस्तस्यासन्नः पुलस्त्यश्च । पुलहः क्रतुरिति भगवानासन्नानुक्रमेण पूर्वाद्याः । तत्र वसिष्ठं मुनिवरमुपाश्रितारुन्धती साध्वी" वृ०सं० ॥ विवाहकाले सैव पत्न्यै पत्या दर्श्यते "अरुन्धतीञ्च रुन्धाहमस्मीति" गोभि० । "एवञ्च सप्तर्षिनिकटवर्त्तिनीं सूक्ष्मां तारामरुन्धतीं रुन्धाहमस्मीति मात्रमन्त्रेण पश्येत्" सं०त०रघु० । अरुन्धती यथा पत्यौ अनुरक्ता एवमेवं त्वं मयि इत्यभिप्रायेण तद्दर्शनम् । आसन्नमृत्यवश्च तां न पश्यन्ति यथोक्तम् सुश्रुते । "न पश्यति सनक्षत्रां यस्तु देवीमरुन्धतीम्" ध्रुवमाकाशगङ्गां च तं वदन्ति गतायुषं" ४दक्षकन्यारूपे धर्मस्य पत्नीभेदे । "ददौ स दश धर्माय" इत्युपक्रम्य "तासां नामानि मे शृणु" इति चोक्त्वा । "अरुन्धती वसुर्यामी लज्जा भानुर्मरुत्वती । सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च भारत ! । धर्मपत्न्यो दश त्वेता इति" 'पृथिवीविषयं सर्वमरुन्धत्यामजायत च" हरिव० । ५जिह्वायाञ्च "अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च । आसन्नमृत्युर्नो पश्येच्चतुर्थं मातृमण्डलम्" इत्युक्त्वा तत्रारुन्धत्यादिशब्दानां पारिभाषिकत्वं दर्शितं यथा "अरुन्धती भवेज्जिह्वा ध्रुवोनासाग्रमुच्यते विष्णोः पदानि भ्रूमध्यं नेत्रेऽग्नौ मातृमण्डलम्" काशीखण्ड० । [वसिष्ठे मुनौ

**अरुन्धतीजानि** पु० अरुन्धती जाया यस्य निङ् समा० ।

**अरुन्धतीदर्शनन्याय** पु० अरुन्धत्यादर्शनमिव दर्शनं यस्य तत् सूचको न्यायः । प्रथमस्थूलदर्शनेन सूक्ष्मदर्शनरूपे न्याये "यथाऽरुन्धतीं दिदर्शयिषुः तत्समीपस्थां स्थूलां तारामसुख्यां प्रथममरुन्धतीति ग्राहयित्वा तां प्रत्याख्याय पश्चादरुन्धतीमेव ग्राहयति" शा०भा० ।

**अरुन्धतीनाथ** पु० ६त० । वसिष्ठे मुनौ तत्पत्यादयोऽप्यत्र ।